Reg. No. : ......................................

Name : ...........................................

# FY-210

**FIRST YEAR HIGHER SECONDARY EXAMINATION, SEPTEMBER 2021**

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 20 Minutes

*निर्देशा :*

- 20 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

*നിർദ്ദേശങ്ങൾ:*

- 20 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കാനതിനും ഇഷ്ടമുള്ളവ തിരഞ്ഞെടുക്കാനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

**I. 1-8 प्रश्नानाम् उत्तराणि कोष्ठकात् चित्वा लिखत । (एकैकस्य एकोऽङ्कः ।)**

**1 മുതൽ 8 വരെയുള്ള ചോദ്യങ്ങൾക്ക് ഉത്തരം ബ്രാക്കറ്റിൽ നിന്നും എടുത്തെഴുതുക.**

**1 സ്കോർ വീതം.** **(8 × 1 = 8)**

(1) 'चिन्ताविष्टयाय सीता' इति काव्यस्य कर्ता कः ?

(पाणिनिः, कुमारनाशान्, शंकराचार्यः)

(2) वाग्भटविरचितः आयुर्वेदग्रन्थः कः ?

(चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयः)

(3) स्वास्थ्यं किम् अवलम्ब्य तिष्ठति ?

(अनुसन्धानं, अध्ययनं, दिनचर्याक्रमं)

(4) सीतायाः माता का ?

(भूमिः, लक्ष्मीः, सरस्वती)

(5) फलागमैः नम्राः भवन्ति । के ?

(तरवः, सत्पुरुषाः, दुर्जनाः)

(6) न्यायात् पथः पदं न प्रविचलन्ति । के ?

(मूर्खाः, चोराः, धीराः)

(7) 'निषादोऽहं' – अत्र निषादः कः ?

(रत्नाकरः, वसिष्ठः, कृष्णः)

(8) तमसानदीतीरे कः वासम् आरभत ?

(पाणिनिः, वाल्मीकिः, कृष्णः)

**II. 9-10 प्रश्नयोः पेटिकातः अक्षराण्युपयुज्य अर्थपूर्णं पदं लिखत । एकैकस्य एकैकोऽङ्कः ।**

**9 മുതൽ 10 പേടികയിൽ (Box) നിന്നും അക്ഷരങ്ങൾ ഉപയോഗിച്ച് അർത്ഥ പൂർണങ്ങളായ പദങ്ങൾ എഴുതുക. 1 സ്കോർ വീതം.** **(2 × 1 = 2)**

| थे, भा, क, ना |
|---|

उदा. – पा _ यम् । – पाथेयम् ।

(9) पशू _ म् ।

(10) सु _ षितम् ।

**III. 11-12 प्रश्नान् उदाहरणानुसारं परिवर्तयत । एकैकस्य द्वौ अङ्कौ । अस्य विभागस्य अधिकाधिकं द्वौ अङ्कौ ।**

**11 മുതൽ 12 ചോദ്യങ്ങൾ ഉദാഹരത്തിനനുസരിച്ച് മാറ്റി എഴുതുക. 2 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ നിന്ന് പരമാവധി ലഭിക്കാവുന്ന സ്കോർ രണ്ട്.** **(2 × 1 = 2)**

(11) उदा. – तत्रैव – तत्र + एव ।

(क) अत्रैव – ______ + ______ ।

(ख) अद्यैव – ______ + ______ ।

(12) उदा. – लतेव – लता + इव ।

(क) छायेव – ______ + ______ ।

(ख) मातेव – ______ + ______ ।

**IV. 13-20 निर्देशानुसारं प्रश्नानामुत्तरं लिखत । एकैकस्य त्रयो अङ्काः । अस्य विभागस्य अधिकाधिकं नव (9) अङ्काः ।**

**13 മുതൽ 20 നിർദ്ദേശ മനുസരിച്ച് ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. 3 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ പരമാവധി ലഭിക്കാവുന്ന സ്കോർ 9.** **(3 × 3 = 9)**

(13) उदाहरणानुसारं वाक्यानि योजयत ।

उदा. – बालकाः लिखन्तु । बालकाः लिखन्ति ।

(1) खलाः निन्दन्तु । खलाः ______ ।

(2) लक्ष्मीः समाविशतु । लक्ष्मीः ______ ।

(3) जनाः स्तुवन्तु । जनाः ______ ।

(14) 'क' विभागात् प्रदत्तभाशययुक्तं श्लोकं 'ख' विभागात् चित्वा लिखत ।

| क | ख |
|---|---|
| दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव भवति । | भवन्ति नम्रास्तरवः फलागमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।<br>अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ।। |
| साहित्यसंगीतकलासु विमुखः साक्षत्पशुखि भवति । | आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।<br>दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ।। |
| परोपकारिणः समृद्धै ।<br>विनयान्विताः भवन्ति । | साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।<br>तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ।। |

(15) पेटिकातः पदान्युपयुज्य रिक्तस्थानानि पूरयत ।

| |
|---|
| पथिकानां |
| फलभाजः |
| कुटुम्बपालनम् |

एवं वा पतिधर्म एव ______ । किन्तु ______ धन प्राणापहरणं किं न पापाय ? अस्य पापस्य तव कलत्र-पुत्रादयः ______ किम् ?

(16) अधोदत्तेषु क्त्वान्त-ल्यबन्त-तुमुन्नन्त पदानि चित्वा लिखत ।

- आरुह्य ।
- मन्त्रयितुम् ।
- श्रुत्वा ।

(1) क्त्वान्तम् – _______ ।

(2) ल्यबन्तम् – _______ ।

(3) तुमुन्नन्तम् – _______ ।

(17) प्रदत्तस्य श्लोकस्य आशयं स्ववाक्यैः लिखत ।

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।

आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ।।

(18) वृत्तलक्षणं योजयित्वा लिखत ।

| (क) | (ख) |
|---|---|
| जतौतु वंशस्थं | यदि तौ जगौ गः । |
| उक्ता वसन्ततिलका | उदीरितं जरौ । |
| स्यादिन्द्रवज्रा | तभजा जगौ गः । |

(19) उपमायाः **त्रीणि** अवयवानि अधः प्रदत्तेषु चित्वा लिखत ।

- साधारण धर्मः ।
- उपमानम् ।
- भरतवाक्यम् ।
- उपमेयम् ।

(20) संख्या संख्यावाचकशब्देन सह यथोचितं योजयत ।

9 – चतुर्दश ।

5 – नव

14 – पञ्च

**V. 21 – 24 पर्यन्तं निर्देशानुसारं उत्तरयत । एकैकस्य चत्वारि अङ्काः । अस्य विभागस्य अधिकाधिकं अष्ठ (8) अङ्काः ।**

**21 മുതൽ 24 വരെയുള്ള ചോദ്യങ്ങൾക്ക് നിർദ്ദേശമാനുസരിച്ച് ഉത്തരം എഴുതുക. 4 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ നിന്ന് പരമാവധി ലഭിക്കാവുന്ന സ്കോർ എട്ട് (8) ആയിരിക്കും.** **(2 × 4 = 8)**

(21) अधः प्रदत्तयोः **एकस्य** श्लोकस्य आशयं लिखत ।

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ।।

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।।

(22) खण्डिकातः अधोरेखाङ्कित पदानां स्थाने कोष्ठकात् समुचितमुत्तरं निर्धार्य खण्डिकां पुनर्लिखत ।

स्वेन कृतस्य कर्मणः फलं स्वेनैव भोक्तव्यं नेतरैः इति भार्यादीनां प्रतिवचनं निशम्य व्याधः नितरां दुखितः अभवत् । पश्चात्तापविवशः सः पुनरागत्य मुनेः चरणयोः निपत्य क्षमामयाचत ।।

(खिन्नः, पादयोः, प्रत्यागत्य, निषादः)

(23) प्रदत्तं गद्यभागं पठित्वा रत्नाकरस्य भार्यायाः मिथः सम्भाषणं लिखत ।

निषादः भार्यायाः समीपं गत्वा एवम् अपृच्छत् । प्रिये ! अहं पथिकानां धनापहरणं कृत्वा एव कुटुम्बं पोषयामि । तादृशस्य कर्मणः फलं भवन्तः अपि अनुभवन्ति वा । वृत्तान्तं श्रुत्वा कुपिता भार्या स्वेन कृतस्य कर्मणः फलं स्वेनैव भोक्तव्यं न इतरैः इति प्रत्यवदत् । पश्चात्तापविवशः निषादः, कष्टं इत्युक्त्वा अगच्छत् ।।

भार्या – अये झटिति प्रत्यागतं वा ?

निषादः – अद्याहं केचन _______ अपश्यम् ।

भार्या – को विशेषः उच्चताम् ?

निषादः – मम _______ फलं यूयं अनुभवथ वा ?

भार्या – न _______ स्वेनैव भोक्तव्यम् ।

निषादः – _______ ।।

(24) श्लोकं पठित्वा गद्यक्रमं पूरयत ।

दोषेण तीव्रो विषयः

कृष्णसर्पविषादपि ।

विषं निहन्ति भोक्तारं

द्रष्टारं चक्षुषाप्ययम् ।।

**गद्यक्रमः** – विषयः दोषेण _____ तीव्रः ______भोक्तारं _____ । अयं चक्षुषा _____ अपि (निहन्ति) ।।

**VI. 25-30 निर्देशानुसारं उत्तरं लिखत । एकैकस्य कृते पञ्चाङ्काः । अस्य विभागस्य अधिकाधिकं पञ्चादश (15) अङ्काः ।**

**25 മുതൽ 30 വരെയുള്ള ചോദ്യങ്ങൾക്ക് നിർദ്ദേശമാനുസരിച്ച് ഉത്തരം എഴുതുക. 5 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ നിന്ന് പരമാവധി ലഭിക്കാവുന്ന സ്കോർ പതിനഞ്ച് (15).** **(3 × 5 = 15)**

(25) श्लोकं पठित्वा प्रश्नानां उत्तराणि लिखत ।

साहित्यसंगीतकलाविहीनः
साक्षात्पशुः पुच्छविषाण हीनः ।
तृणं न खादन्नपि जीवमान –
स्तद्भागधेयं परमं पशूनाम् ।।

(क) साहित्यसंगीतकलाविहीनः कः ?

(ख) श्लोके अधोरेखाङ्कितपदं विश्लेषयत ।

(ग) 'भाग्यम्' इत्यर्थे प्रयुक्तं पदं किम् ?

(घ) श्लोकस्याशयं स्ववाक्यैः लिखत ।

(26) यथोचितं योजयत ।

| क | | ख |
|---|---|---|
| पशूनां | – | दुर्जनः |
| खलः | – | जन्तूनां |
| तरवः | – | मित्रता |
| घनाः | – | वृक्षाः |
| मैत्री | – | मेघाः |

(27) गद्यभागं पठित्वा प्रश्नानां उत्तराणि लिखत ।

तिष्ठत तत्रैव तिष्ठत । भवदीयं सर्वं प्रयच्छत । नो चेत् प्राणान् हरिष्याम्यहम् । काननमध्यात् कर्ण कठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन् । झटिति तीक्ष्णं रक्तपङ्किलं खड्गं प्रसार्य भयङ्करः कश्चन निषादः तेषां पुरतः आपतत् । सर्वमपि प्रयच्छत, स उच्चैराक्रोशत् ।

(क) खड्गं प्रसार्य कः अपतत् ?

(ख) गद्यभागे विद्यमानम् एकं क्त्वान्तं अव्ययपदं लिखत ।

(ग) सः निषादः किं आक्रोशत् ?

(घ) गद्यभागस्य कृते उचितं शीर्षकं लिखत ।

(ङ) उदाहरणानुसारं विश्लेषयत –

उदा. – फलमपि – फलम् + अपि ।

• सर्वमपि – ______ + ______ ।

(28) माहेश्वरसूत्राणि क्रमीकुरुत ।

एओङ् । हयवरट् । अइउण् । ऋ लृ क् । ऐ औ च् ।।

(29) प्रदत्तनाटकसङ्केतेषु एकम् अधिकृत्य उदाहरण सहितं टिप्पणीं लिखत ।

- सूत्रधारः ।
- नेपथ्यम् ।
- आत्मगतम् ।

(30) "भावैकरसं मन" इति पाठमधिकृत्य सूचनानुसारं लघुटिप्पणीं लिखत ।

- कालिदासः ।
- कुमारसम्भवम् ।
- पञ्चमहाकाव्यम् ।
- शिवपार्वत्योः भाषणम् ।
- ब्रह्मचारिकृतं शिवदूषणम् ।
- पार्वत्याः प्रतिवचनम् ।

**VII. 31-40 निर्देशानुसारं उत्तरं लिखत । एकैकस्य षट् अङ्काः अस्मिन् विभागे अधिकाधिकतया त्रिंशत् (30) अङ्काः ।**

**31 മുതൽ 40 നിർദ്ദേശമാനുസരിച്ച് ഉത്തരം എഴുതുക. 6 സ്കോർ വീതം. ഈ വിഭാഗത്തിൽ നിന്ന് പരമാവധി ലഭിക്കാവുന്ന സ്കോർ മുപ്പത് (30). (5 × 6 = 30)**

(31) प्रदत्तयोः इष्टतमश्लोकं चित्वा सकारणं विशदयत ।

(क) भवन्ति नम्रास्तरवः फलागमै –
नर्वाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ।।

(ख) निन्दन्तु नीति निपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।

(32) संस्कृतभाषया अनुवदत्त ।

(1) രമേശൻ വിദ്യാലയത്തിൽ പോകുന്നു.
(Ramesan goes to School)

(2) ഞാൻ പാഠങ്ങൾ പഠിക്കുന്നു.
(I am learning lessons)

(3) സുഭാഷിതങ്ങൾ അമൂല്യങ്ങളാണ്.
(Subhashitas' are precious)

(33) कथास्तम्भान् क्रमीकुरुत ।

- रत्नाकरो नाम निषादोऽहम् ।
- तमसानद्याः तीरे आश्रमे वासम् आरभत ।
- "सर्वमपि प्रयच्छत" सः उच्चैराक्रोशत् ।
- कमण्डलुश्चेत् कमण्डलुः दातव्यं तत् ।
- स्वेन कृतस्य कर्मणः फलं स्वेनैव भोक्तव्यम् ।
- तदा अतितेजस्विनं कञ्चन मुनि श्रेष्ठम् अपश्यन् ।

(34) गद्यभागं संगृह्य लिखत ।

"तेष्वन्यतमः महान् योगी वसिष्ठस्तमपृच्छत् "अये वत्स ! कस्त्वम् ? केवलं कमण्डलुर्वल्कलश्च अस्माकं धनम् । तेन तव किं प्रयोजनम् ?" कमण्डलुश्चेत् कमण्डलुः दातव्यं" तत् निषादः सक्रोधम् अवदत् । तथापि मुनेः वत्स इति संबोधनेन तस्य हृदयमभूतपूर्वां कामप्यनुभूतिम् अलभत ।

"रत्नाकरो नाम निषादोऽहम् । पथिकानां धनानि अवश्यञ्चेत् प्राणान् चापहृत्य कुटुम्बं पोषयामि ।" सः प्रत्यवदत् ।

(35) 'क' विभागे प्रदत्तस्य श्लोकस्य प्रथमपादेनयुक्तं द्वितीयपादं 'ख' विभागात् चित्वा लिखत ।

| 'क' | 'ख' |
|---|---|
| (1) नहि देहिनि शोभनंभवे –<br>च्चरितार्थे सति जीवितं पुनः । | • अवनौ च तनुर्मनोरथो<br>मम चैषां सुषमासु लेष्यते ।। |
| (2) सुसिताम्बर ! वन्द्य ! वृद्ध ! भो<br>बिसिनीतन्तुमरीचिकैशिक ! । | • सुतरां नटने समापिते<br>स च रङ्गाद्विरमेत् कुशीलवः ।। |
| (3) अथवातिमनोहराद्बहि –<br>र्जगतो मे विरहो न सम्भवेत् । | • लसितस्मित ! चारुचन्द्रिका –<br>भसितस्नात ! मृगाङ्क ! ते नमः ।। |

(36) श्लोकं पठित्वा सम्बोधनप्रथमायाः त्रीणि रूपाणि चित्वा लिखत ।

जनयित्रि ! विलोकयाम्यहं
भवतीं मा दधतीं सुवत्सलाम् ।
निजमश्रुभुवं समुज्ज्वला –
मुपयान्तीमनघे ! वसुन्धरे ! ।।

(37) उचित संख्यावाचकशब्दैः रिक्तस्थानानि पूरयत ।

| | |
|---|---|
| 1. _______ । | 6. षट् । |
| 2. द्वे । | 7. _______ । |
| 3. _______ । | 8. अष्ट । |
| 4. चत्वारि । | 9. _______ । |
| 5. _______ । | 10. _______ । |

(38) सूचनानुसारं तत्वामृतबिन्दवः इति पाठाधारेण टिप्पणीं लिखत ।

**सूचनाः –**

- विवेकचूडामणिः ।
- शङ्कराचार्यः ।
- अद्वैतवेदान्तसिद्धान्तः ।
- इन्द्रियसंयमनम् ।
- दुःखनिवारणम् ।
- पञ्चत्वप्राप्तिः ।

(39) खण्डिकातः **त्रयः** सूक्तयः उद्धृत्य लिखत ।

"पश्चात् गच्छन्तस्ते त्रयः कञ्चन जनपदं प्रापुः । ते सर्वे ग्रामीणैः पृथक् स्वगृहं नीतवन्तः । प्रथमः भोजनार्थं सूत्रिकामलभत । सः "दीर्घसूत्री विनश्यती" ति सूक्तिं विचिन्त्य भोजनमन्यजत् । द्वितीयाय अपूपः दत्तः । "अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषमि" त्युक्त्वा भक्षणं विहाय गतः । तृतीयाय माषवटिकां भोजनाय अयच्छन् । सोऽपि "छिद्रेष्वनर्थाः बहुलीभवन्ति" इत्युक्त्वा अनश्नन् गतः ।

(40) अधोदत्तं गद्यभागं पठित्वा मलयालभाषया आङ्गलभाषया वा अनुवदत ।

सामाजिकापचयस्य हेतुर्वयमेवेति स्मरणीयमस्ति । भविष्यत्काले कीदृशीं दशां प्राप्नुयात् इति निर्णेतुं शक्तिरस्मास्वेव । भूतकालस्य पिरपाकः एवाद्यतनी स्थितिरित्यतः भाविभागधेयस्य संसृष्टौ वयमेव समर्थाः भवेम ।"

**VIII. 41-42 निर्देशानुसारं उत्तरयत । एकैकस्य षट् अङ्काः । अस्य विभागस्य अधिकाधिकं षट् (6) अङ्काः ।**

**41 മുതൽ 42 നിർദ്ദേശമാനുസരിച്ച് ഉത്തരം എഴുതുക. 6 സ്കോർ വീതം. ഈ വിഭാഗത്തിലടിക്കുന്ന പരമാവധി സ്കോർ (6).** **(1 × 6 = 6)**

(41) समयवाचकशब्दान्युपयुज्य दिनचर्यां पूरयत ।

सुभाषः____ (4 : 30) वादने उत्तिष्ठति । सः ______ (5 : 00) वादने शौचाद्यनन्तरं ______ (5 : 15) वादनात् व्यायामं करोति । अनन्तरं ______ (6 : 30) वादने स्नानं कृत्वा _____ (7 : 00) वादने प्राणायामं ध्यानं च परिशीलयति । सः ______ (7 : 30) स्वाध्यायं करोति । ______ (8 : 30) वादने प्रभातभक्षणं स्वीकृत्य ______ (9:00) वादने विद्यालयं प्रति गच्छति ।।

(42) 'त्यज सीतामिह तां हतामहो' – सीतायाः चिन्ताधाराः सूचनामनुसृत्य उपन्यस्यत ।

**सूचनाः –**

- 'चिन्ताविष्टयाय सीता' ।
- कुमारनाशान् ।
- एन् गोपालपिल्ला ।
- सीताविचारलहरी ।
- सूर्यपक्षतः दशरथपक्षतः च प्रणामः ।
- चन्द्राय जनकाय च प्रणामः ।
- अन्तिम प्रणामः ।
- जनयित्रीं प्रति निवेदनम् ।